# Ganesha Lila StutiH 2

# ગણેશલીલાસ્તુતિઃ ૨

## Document Information

Text title : Ganesha Lila Stutih

File name : gaNeshalIlAstutiH2.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan

Latest update : May 24, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# Ganesha Lila StutiH 2

# ગણેશલીલાસ્તુતિઃ ૨

ૐલાક્ષાસિન્દૂરવર્ણં સુરવરનમિતં મોદકૈર્મોદિતાસ્યં
    હસ્તે દન્તં દદાનં હિમકરસદૃશં તેજસોગ્રં ત્રિનેત્રમ્ ।
દક્ષે રત્નાક્ષસૂત્રં વરપરશુધરં સાખુ સિંહાસનસ્થં
    ગાઙ્ગેયં રૌદ્રમૂર્તિં ત્રિપુરવધકરં વિઘ્નભક્ષં નમામિ ॥ ૧॥

ગૌરીપુત્રં ત્રિનેત્રં ગજમુખસહિતં નાગયજ્ઞોપવીતં
    પદ્માક્ષં સર્વભક્ષં સકલજનપ્રિયં સર્વગન્ધર્વપૂજ્યમ્ ।
સમ્પૂર્ણભાલચન્દ્રં વરદમતિબલં હન્તૃકં ચાસુરાણાં
    હેરમ્બમાદિદેવં ગણપતિમમલં સિદ્ધિદાતારમીડે ॥ ૨॥

યં બ્રહ્મ વેદાન્તવિદો વદન્તિ પરં પ્રધાનં પુરુષં તથાન્યે ।
વિશ્વોદ્ગતેઃ કારણમીશ્વરં વા તસ્મૈ નમો વિઘ્નવિનાશકાય ॥ ૩॥

ગજવદનમચિન્ત્યં તીક્ષ્ણદન્તં ત્રિનેત્રં
    બૃહદુદરમનન્તં દન્તમાલે દદાનમ્ ।
પરશુચષકપદ્મદ્વન્દ્વહસ્તારવિન્દં
    હરિયુગલનિવિષ્ટં શ્રીગણેશં ભજામિ ॥ ૪॥

અભયવરદપાણિં લાડૂપાત્રં સુદન્તં
    નરપતિજપમાલાં નાગપાશાઙ્કુશં ચ ।
કનકમયવિચિત્રં મુદ્ગરં પાણિપદ્મે
    પરશુમપિ વહન્તં વિઘ્નરાજં નમામિ ॥ ૫॥

વિઘ્નેશં વિશ્વવન્દ્યં સુવિપુલયશસં લોકરક્ષાપ્રદક્ષં
    સાક્ષાત્સર્વાપદાસુ પ્રશમનસુમતિં પાર્વતીપ્રાણસૂનુમ્ ।
પ્રાયઃ સર્વાસુરેન્દ્રૈઃ સસુરમુનિગણૈઃ સાધકૈઃ પૂજ્યમાનં
    કારુણ્યેનાન્તરાયામિતભયશમનં વિઘ્નરાજં નમામિ ॥ ૬॥

ઉચ્ચૈર્બ્રહ્માણ્ડખણ્ડદ્વિતય સહચરં કુમ્ભયુગ્મં દધાનઃ

પ્રેઙ્ખન્નાગારિ પક્ષપ્રતિભટવિકટ શ્રોત્રતાલાભિરામઃ ।
દેવ્યાઃ શમ્ભોરપત્યં ભુજગપતિતનુસ્પર્ધિ વર્ધિષ્ણુહસ્ત-
સ્ત્રૈલોક્યાશ્ચર્યમૂર્તિઃ સ ભવતુ સતતં ભૂતયે કુઞ્જરાસ્યઃ ॥ ૭॥

નમો નમો ગજેન્દ્રાય એકદન્તધરાય ચ ।
નમઃ ઈશ્વરપુત્રાય ગણેશાય નમો નમઃ ॥ ૮॥

માતા યસ્ય ઉમાદેવી પિતા યસ્ય મહેશ્વરઃ ।
મૂષકો વાહનં યસ્ય સ નઃ પાયાદ્ગણાધિપઃ ॥ ૯॥

વન્દે વરાભયપિનાકકપાલખડ્ગખટ્વાઙ્ગદન્તમુસલાબ્જકરં ત્રિનેત્રમ્ ।
ભીમં જટામુકુટિનં કમલાસનસ્થં કાશ્મીરવાસમમલં ગણરાજમાદ્યમ્ ॥ ૧૦॥

રક્તાઙ્ગરાગં પરશ્વક્ષમાલાસુદન્તપાણિં સિતલડ્ડૂપાત્રમ્ ।
ગજાનનં સિંહરથાધિરૂઢં ગણેશ્વરં વિઘ્નહરં નમામિ ॥ ૧૧॥

સંસિદ્ધ્યર્થનમત્સુરાસુરમિલન્મૌલિસ્થિતપ્રોલ્લસત્-
સદ્રત્ન પ્રભવ પ્રકૃષ્ટ વિભવ પ્રેઙ્ખન્મયૂખોજ્જ્વલત્ ।
શ્રેયો વિઘ્નમહાભયપ્રશમને દિવ્યં યદેકૌષધં
ભૂયાન્નો દ્વિરદાનનાઙ્ઘ્રિકમલદ્વન્દ્વં તદિષ્ટાપ્તયે ॥ ૧૨॥

બિભ્રત્પઞ્ચમુખાનિ યોયમુદિતઃ સ્વાતન્ત્ર્યમાત્રાત્મના
શક્તેર્વૈભવતઃ પરપ્રતિહતદ્વૈતાખ્યવિઘ્નવ્યયઃ ।
એકીભૂતમુખઃ સકારણગણાનુકારિણા તેજસા
દેવઃસંપ્રતિ ભાસતાં મયિ યથા તત્ત્વં ગણાધીશ્વરઃ ॥ ૧૩॥

હસ્તીન્દ્રાનનમિન્દુચૂડમરુણચ્છાયં ત્રિનેત્રં રસાદાશ્લિષ્ટં
પ્રિયયા સમપદ્મધમકરયા સ્વાઙ્કસ્થયા સન્તતમ્ ।
બીજાપૂરગદાધનુસ્ત્રિશિખયુક્ચક્રાબ્જપાશોત્પલ-
વ્રીહ્યગ્રસ્થવિષાણરત્ન કલશાન્ હસ્તૈર્વહન્તં ભજે ॥ ૧૪॥

દેવ સ્થૂલતનું ગજેન્દ્રવદનં લમ્બોદર સુન્દરં
વિઘ્નેશં મદગન્ધલોલમધુપવ્યાલોલગણ્ડસ્થલમ્ ।
દન્તાઘાતવિદારિતાહિતજનં સિન્દૂરશોભાકરં
વન્દે શૈલસુતાસુતં ગણપતિં સિદ્ધિપ્રદં કામદમ્ ॥ ૧૫॥

દ્વિચતુર્દશવર્ણભૂષિતાઙ્ગં મુસલામ્ભોજધરં મહોપવીતમ્ ।
દ્વિમૃગાધિપગામિનં ત્રિનેત્રં હરપુત્રં દ્વિરદાનનં ભજેઽહમ્ ॥ ૧૬॥

જટામુકુટમણ્ડિતં ત્રિનયનં ભજે ષડ્ભુજં
    સતીસરનિવાસિનમસુરનાશનં લોહિતમ્ ।
વરાભયપિનાકિનં ત્વસિકપાલભૃચ્છૂલિનં
    ગણૈર્વૃતગણેશ્વરં કમલગં ચ મીમાકૃતિમ્ ॥ ૧૭॥

ગજાનનં ભૂતગણાધિસેવિતં કપિત્થજામ્બૂફલસારભક્ષણમ્ ।
ઉમાપતેઃ શોકવિનાશકારણં નમામિ વિશ્વેશ્વરમાશુ સિદ્ધિદમ્ ॥ ૧૮॥

લમ્બોદરૈકવદનઃ કમલાસનસ્થ-
    શ્ચન્દ્રાર્ધમૌલિરમલો ભુજગેન્દ્રહારઃ ।
ભીમોઽષ્ટબાહુરુદિતાર્કમરીચિરષ્ટ
    સિદ્ધિપ્રદો ભવતુ વાઞ્છિતસિદ્ધિદોનઃ ॥ ૧૯॥

યોઽભ્યર્ચિતઃ સુરગણૈર્વરસિદ્ધિહેતોશ્છેત્તં
    ભયાનિ ચ કરે પરશું દધાનઃ ।
દેવઃ સ શમ્ભુદયિતાપરિવર્ધિત
    શ્રીર્વિઘ્નાન્નિવારયતુ વારણરાજવક્ત્રઃ ॥ ૨૦॥

ઇતિ ગણેશલીલાસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by Aruna Narayanan

*Ganesha Lila StutiH 2*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*